Issue-12; Vol.01, Sept. 2021 Impact Factor: 6.003 (I2OR)
ISSN–2231-1130
VEETHIKA

# आचार्यानिर्वाणस्य योगविमर्शः

**चन्दन–पड़,**
शोधच्छात्रः, संस्कृत–विभागः,
सिधो–कानहो–वीरसा–विश्वविद्यालयः,
पुरुलिया, पश्चिमबङ्गः।

बङ्गप्रदेशे ये पण्डिताः वेदव्याख्याकाराश्चजन्मग्रहणं कृतवन्तः तेषुश्रीमदनिर्वाणः सर्वश्रेष्ठः सर्वोत्तमश्च। अनिर्वाण एकोमहान् योगी आसीत्। तेन पातञ्जलयोगसूत्राणां व्याख्या बङ्गभाषया कृता।'अनिर्वाण–आलोय–पातञ्जल–योग–प्रसङ्ग' इत्यस्मिन् ग्रन्थे षट्षष्ठि–पातञ्जलसूत्राणां व्याख्या तेन कृता। तत्र समाधिपादस्य षट्त्रिंशत्सूत्राणाम्, साधनपादस्य सप्तविंशतिसूत्राणाम्, विभूतिपादस्य अष्टसूत्राणां तथा कैवल्यपादस्य एकस्य सूत्रस्य व्याख्या परिलक्ष्यते। तेन अन्तर्योगः, योगसमन्वयप्रसङ्गादि ग्रन्थेऽपि योगदर्शनस्य विविधविषयानाम् आलोचनं कृतम्।

शोधप्रबन्धेऽस्मिन् सम्प्रतिअनिर्वाणानुसारं योगदर्शनस्य प्रासङ्गिकत्वं तथोपयोगित्वम् उपस्थापितमस्ति। यत् सम्प्रतिकालेअतीवमहत्वपूर्णवार्तांप्रेरयिष्यति।

अनिर्वाणः, योगः, पतञ्जलिः, समापत्तिः, असम्प्रज्ञातयोगः, क्रियायोगः, स्वाध्यायः, ईश्वरप्रणिधानम्।

बङ्गप्रदेशे ये पण्डिताः वेदव्याख्याकाराश्च जन्मग्रहणं कृतवन्तः तेषु श्रीमदनिर्वाणः सर्वश्रेष्ठः सर्वोत्तमश्च। अनिर्वाणस्य पूर्वनाम श्रीनरेन्द्रनाथधरः आसीत्। मातुर्नाम सुशीलासुन्दरीदेवी पितुश्च राजचन्द्रधरः आसीत्। स सन्तानेषु ज्येष्ठः आसीत्। यदा अनिर्वाणस्यायूंषि त्रयोदश आसन् तदा तस्य श्रीनिगमानन्देन सह साक्षात्कारमभवत्। साक्षात्कारस्य परं परिब्राजकस्य विचारः तस्य मनसि समागतः। गुरुवाक्यं ब्रह्मवाक्यं मत्वा वेदविषये स्नातकोत्तरपरीक्षायाः परं तेन मठस्य कार्ये मनोनिवेशं कृतम्। गुरुकृपया सहसा वेदस्य निगूढार्थोद्घाटनकार्ये कृतसङ्कल्पकमभवत्। तदनु तेन ऋग्वेदस्य गायत्रीमण्डलस्य व्याख्यानुवादश्च कृतः। 'वेदमीमांसा' इति ग्रन्थस्य कृते तेन 'रवीन्द्रपुरष्कारो' लब्धः। न तु केवलं संहितायाः अपितु उपनिषच्छ्रीमद्भगवद्गीतादर्शनशास्त्रस्योऽपि तेन विविधानि कार्याणि सम्पादितानि। संस्कृतग्रन्थानां पश्चाद् बङ्गसाहित्येऽपि स स्वरचनया योगदानं कृतवान्। यथा अदिति–कावेरी–पत्रलेखा–स्नेहाशिसादयः ग्रन्थाः तेन विरचिताः। ततः उपनिषद्व्याख्या–वेदान्तजिज्ञासा–गीतानुवचन–योगसमन्वयप्रसङ्गादयः ग्रन्थास्तस्य रहस्यात्मकव्याख्याभूताः सन्ति।

अनिर्वाण एको महान् योगी आसीत्। तेन पातञ्जलयोगसूत्राणां व्याख्या बङ्गभाषया कृता। 'अनिर्वाण–आलोय–पातञ्जल–योग–प्रसङ्ग' इत्यस्मिन् ग्रन्थे षट्षष्ठि–पातञ्जलसूत्राणां व्याख्या तेन कृता। तत्र समाधिपादस्य षट्त्रिंशत्सूत्राणाम्, साधनपादस्य सप्तविंशतिसूत्राणाम्, विभूतिपादस्य अष्टसूत्राणां तथा कैवल्यपादस्य एकस्य सूत्रस्य व्याख्या परिलक्ष्यते।

वैदिकसाहित्यमेव खलु योगदर्शनस्य आधारभूतम्। तत्रोल्लिखितमस्ति ब्रह्मवादीऋषीणां पार्श्वे आत्मवादीमुनयः तिष्ठन्ति। योग एव तेषां मुख्यसाधनम् आसीत्। वैदिकोपनिषत्सु कठश्वेताश्वतरोपनिषद्द्वयं योगनाम्ना अभिधीयते। पुनश्चोल्लिखितम्–"नाडीविज्ञानम् हटयोगस्य वैशिष्ट्यरूपेण अस्तीति विषयस्योल्लेखः छान्दोग्य–बृहदारण्यक–कठ–मुण्डक–मैत्रायण्युपनिषदि दरीदृश्यते।" तत्र कठोपनिषदः तथा ऋक्संहितायाः दृष्टान्तोपस्थापनपूर्वकं वैदिकयोगस्य पुनःप्रतिष्ठायाः कृतसंकल्पो द्रष्टुं

शक्यते। तस्य मतानुसारं योगोपनिषत्सु योगविद्यायाः सविशदं वर्णनं विद्यते। तत्र वैदिक–धीयोगः, सांख्योक्तो राजयोगः तथाच शैव–हठयोगस्य समन्वयः परिलक्ष्यते।

'अन्तर्योगः' इति ग्रन्थे योगस्य विविधाः मार्गाः उद्घाटिताः सन्ति। तत्र सविस्तरम् अष्टाङ्गयोगस्यालोचनम् अस्ति। बहिरङ्गयोग–अन्तरङ्गयोग–चतुरङ्गयोग–मन्त्र योग–धारणायोग–ध्यानयोग–समाधियोगादीनां वैशद्येन सालम्बननिरालम्बनयोर्वर्णनमस्ति। तदनु योगसमन्वयप्रसङ्ग–पत्रलेखा–प्रवचन–शिक्षा–आ रण्यकादिषु ग्रन्थेषु योगतत्त्वं सविशदं वर्णितम्।

आस्तिकदर्शनेषु अध्यात्मदर्शनेषु चापि योगस्य माहात्म्यं संलक्ष्यते। योगदर्शनं मनुष्यजीवनस्य संयमार्थं कार्यं करोति। सामान्यतया युक्त–मेलनादेरर्थे √युज् धातोः प्रयोगो भवति, परन्तु शब्दकल्पद्रुमनुसारम्'युज समाधौभावादौ यथायथं घञ्' इत्यनेन योगशब्दो निष्पन्नः। जीवात्मना सह परमात्मनः मेलनमेव योगः कथ्यते, परन्तु सन्नहनो–उपाय–ध्यानादिषु अर्थेषु योगशब्दो निष्पन्नो भवतीति अमरकोषमतम्।अतः "योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु" इत्येवम् तत्र पठ्यते। श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेनोक्तम् –"योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय। सिद्धयसिद्धयोः समो भूत्वा समत्वं योग उच्यते।" पुनश्चोक्तम्–"तस्माद् योगाय युज्यस्व योगः कर्मसु कौशलम्", "योगी युञ्जीत सततमात्मानं रहसि स्थितः", "मनः संयम्य मच्चित्तो युक्त आसीत् मत्परः", किन्तु महर्षिणा पतञ्जलिना प्रक्तोम्–"योगश्चित्तवृत्ति निरोधः" इति। भाष्यकृद्भिः व्यासपादैरुल्लिखिम्–"योगः समाधिः" इति। अनिर्वाणपादेनापि व्यासदेवम् अनुसरणं कृत्वा उक्तम्–"युज् समाधौ"– चित्तं समाहितव्यम्। समाधिरेव पातञ्जलयोगस्य विशेषलक्ष्यं वर्तते। युक्तार्थे युज् धातोः प्रयोग ऋग्वेदेऽपि परिलक्ष्यते 'युञ्जते मन उत युञ्जते धियो'(ऋग्वेद.५।८१।१)"इति। तदनु तेन पातञ्जलयोगेन सह वैदिकयोगस्य वैसादृश्यम् उन्मोचितम्। तैः लिखितम्–"मनसः संयोगो मनोयोगः, यत् पातञ्जलयोगे परिलक्ष्यते। धीयोगो वैदिकयोग इति कथ्यते।" योगस्य माहात्म्यं कथितमस्ति श्वेताश्वतरोपनिषदि। तत्रोक्तमस्ति –

"पृथ्व्यप्तेजोऽनिलखे समुत्थिते पञ्चात्मके
योगगुणे प्रवृत्ते।

न तस्य रोगो न जरा न मृत्युः प्राप्तस्य
योगाग्निमयं शरीरम्।।"

**समापत्तिः**

समापत्तेः लक्षणप्रदानकाले पतञ्जलिना प्रक्तोम्–"क्षीणवृत्तेव भिजातस्येर मनेर्ग्रहतृग्रहणग्राह्येषुतत्स्थ–तदञ्जनता समापत्तिः।""अनिर्वाण–आलोय–पातञ्जलयोग–प्रसङ्ग" इत्यस्मिन् ग्रन्थे समापत्तेः व्याख्या कृता अनिर्वाणपादेन। तत्र तेन निगदितम् –"तत्स्थ–तदञ्जनता" इत्यस्यार्थः तत्र स्थितिः, तेन सह एकात्मत्वस्थापनमेव समाधेः कौशलं वर्तते। यदा एकस्मिन् विषये स्वीयस्थितिः तथाच दीर्घकालपर्यन्तं धारणाशक्तिः उत्पद्यते तदा तेन सह चित्तैकात्मं भवति, तत्समापत्तिः"भवतीति।अतः चित्तवृत्तिविनष्टे सति समापत्तिः प्रारभ्यते। ग्रहितृ–ग्रहण–ग्राह्यभेदेन समापत्तेः विभागत्रयं कृतं पतञ्जलिना। तद्भेदानुसारमनिर्वाणेन अपि ज्ञाता–ज्ञेय–ज्ञानरूपेण समापत्तेः भेदत्रयं कृतम्। तत्र ग्राह्यस्य ज्ञेयरूपेण, ग्रहणस्य ज्ञानरूपेण तथा ग्रहितुः ज्ञातृरूपेण सादृशं निरूपितम्। ग्राह्य–ग्रहण–ग्रहितृषु कमप्येकं विषयमवलम्ब्य समापत्तिः जायते। बहिर्वस्तु यद्वा आभ्यन्तरं ग्राह्यं भवितुं शक्यते। स्वीयबुद्धिः आत्मचौतन्यं वा ग्रहितेति। अनेन क्रमेण समापत्तिः प्रवर्तिता भवतीति।"तत्रैव सवितर्क–सविचार–सानन्द–सास्मितासमापत्तिभेदेन समापत्तेः भेदचतुष्टयं प्रदर्शितम्, यत्तु सम्प्रज्ञातसमाधेः विभागो वर्तते। तेषां लक्षणमपि तत्र प्रदत्तम्। तन्मतानुसारं बहिर्देशाद् यत्किमपि स्थूलविषयमवलम्ब्य सवितर्क–समापत्तिः प्रवर्तिता

भवति तथैव सूक्ष्मविषयमवलम्ब्य सविचार–समापत्तेः सृष्टिर्भवति। तेन मन्यते एतद्विभागद्वयं ग्राह्यविषयत्वेनोत्पद्यते। सानन्द–सास्मितासमापत्तयोः स्वीयलक्षणं प्रदत्तम्। तत्रोक्तम्–''करणाद् ग्रहणाद्वा यदुद्भवो जायते, तत्तु सानन्द–समापत्तिः। ग्रहीतृबोधं स्वीकृत्य सास्मिता–समापत्तिः सम्पन्ना भवति। एतेषु सवितर्कः सविचारश्च प्राकृतिको वर्तते।''समाधिरेव अस्माकम् उद्देश्यो वर्तते। स्थूलत्वेन सूक्षत्वेन वा ग्राह्यविषयस्य वैशादृश्यं परिलक्ष्यते। चित्तेन मुख्यविषयस्य ग्रहणं भवति चेत् सानन्द–समापत्तिरुत्पद्यते। ततोः सास्मिता–समापत्तिः समागच्छते। दृष्टान्तरूपेण श्रीकृष्णचित्रं स्वीकृत्य ध्यानस्योदाहरणं प्रदत्तं तेन। ग्राह्यवस्तुरूपेण बहिर्जगति परिदृश्यमानमस्ति। तेन सवितर्को निवितर्कश्चेति भेदेन ग्राह्यविषयस्य विभागः कल्पितः। तत्रैव कथितं ''शब्दार्थः मिथुने सति वितर्को जायते। चित्ते एकरसावस्था न दृश्यते, विचित्ररसोपस्थितिः तत्र दरीदृश्यते। तदा तत्स्थ तदञ्जनं भवतीति, तथापि अनुभववैचित्रं संलक्ष्यते। योगीनां विचित्रशक्तेः भूमिकेयं तथाच भक्तानामुल्लासम्। निवितर्के सति शब्दार्थज्ञानानां पृथकीकरणीयमिति।''सर्वानुभूतिः यदा एकरसप्रत्ययो भवति, तदा निवितर्कसमाधिः भवतीति तस्याभिमतं वर्तते। निवितर्कस्य संङ्गायां महर्षिपतञ्जलिना प्रक्तोम्–''स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निवितर्का''इति।

**असम्प्रज्ञातयोगः**

सम्प्रज्ञातयोगसमाप्तेरनन्तरम् असम्प्रज्ञातयोगः आरभ्यते। 'न सम्प्रज्ञातः असम्प्रज्ञातः' इत्यनेन तत्र नञ्–तत्पुरुषसमासो विद्यते। अर्थाद् यदा सम्प्रज्ञातसंस्कारः पूर्णतया विलीनो भवति, तदा असम्प्रज्ञातयोगस्योद्भवो जायते। महर्षिपतञ्जलिना योगसूत्रे कथितम्–''विराम–प्रत्ययाभासपूर्वः संस्कारशेषोऽन्यः।''व्यासदेवेनोक्तम् –''सर्ववृत्तिप्रत्यस्तमये संस्कारशेषो निरोधः चित्तस्य समाधिः असम्प्रज्ञातः।''असम्प्रज्ञातयोगस्य व्याख्याकाले अनिर्वाणपादैः श्रीमद्भगवद्गीता–उपनिषदयोः दृष्टान्तं प्रतिस्थापितम्। तैरुक्तम्–''विरामप्रत्ययस्य अभ्यासपूर्वकम् असम्प्रज्ञातयोगसिद्धिर्भवति। चित्तस्योपशमैव विरामप्रत्ययः। चित्तं पर्यायक्रमेण उपरतं भवति, मनः शान्तं भवति, शून्यावेशस्य वातावरणं भवति।'' पुनः तत्रैव श्रीमद्भगवद्गीतायाः दृष्टान्तोल्लेखपूर्वकं लिखितं दष्टृरूपेण अस्माकं स्थितिः दृश्यते। एतद्विहाय सर्वं लयप्राप्तिर्भवति। सम्प्रज्ञातयोगेन प्रचेष्टा परिलक्षिता, विषयं प्रति ज्ञानप्राप्तेः अभिलाषा दृश्यते। असम्प्रज्ञातयोगे साधारणतया कापि जिज्ञासा न परिलक्षिता भवति, तदा ज्ञानप्रकटता स्वतविषयता प्रकाशिता भवति, परन्तु यावद् विषयप्रकटता परिलक्षिता भवति तावत्पर्य्यन्तम् असम्प्रज्ञातयोगः पूर्णरूपेण न सम्पद्यते। असम्प्रज्ञातस्थितौ विषयतृष्णा तथाच ज्ञानतृष्णा सर्वं विलीनं भवति, चित्तं सर्वसंस्कारशून्यं भवति। ब्रह्मज्ञानलाभेच्छाकाले 'सुवेदेति' इति वदति चेत् सः किमपि न जानाति इत्यस्मिन् विषये केनोपनिषदः दृष्टान्तं तेनोपस्थापितम्। सर्वाभिमानशून्ये सति असम्प्रज्ञातयोगः प्रवर्तितो भवति। असम्प्रज्ञातयोगस्य पूर्वनामासीद् 'असंज्ञा' इति 'अनिर्वाण–आलोय–पातञ्जलयोग–प्रसङ्ग' ग्रन्थे तेन कथितम्। तत्र असङ्गायाः दृष्टान्तरूपेण बृहदारण्यकोपनिषदः याज्ञवल्क्य–मैत्रेयी–संवादः उपस्थापितः। तस्यां स्थितौ सर्वज्ञता सत्त्वेऽपि वस्तुज्ञानं न दृश्यते। तेन योगजप्रज्ञा–विदेहलय–प्रकृतिलयभेदेन असम्प्रज्ञातयोगस्य विभागत्रयं कृतम्। 'न वेदा' इति भावाद् आदौ योगज–प्रज्ञा समागच्छति, ततो विदेहलयः प्रकृतिलयश्च सम्पन्नो भवेदिति तन्मतम्।

**क्रियायोगः**

साधनपादस्य प्रथमसूत्रेण क्रियायोगस्य वर्णनं कृतं पतञ्जलिना। तपः स्वाध्यायेश्वरप्रणिधानञ्चेति क्रियायोगो भवति। योगसूत्रे कथितमस्ति''तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः'' इति।

अनिर्वाणमतानुसारं क्रियायोग एव सहजयोगः। ''अनिर्वाण–आलोय–पातञ्जलयोग–प्रसङ्ग' इत्यस्मिन् ग्रन्थे क्रियायोगस्य वर्णनं समुपलभ्यते। तत्र तेन लिखितं क्रियायोगोऽयं सार्वभौमभूतः। तपः स्वाध्यायः ईश्वरप्रणिधानं च नियमयोगाङ्गे अन्तर्भुक्ताः सन्ति। तेन मन्यते अनेन साधनात्रयेण चित्तक्लेशं दूरीभवति तथा समाधिलाभं भवति। तत्र क्रियायोगस्य फलमपि तेनोक्तम् –''अष्टाङ्गयोगेन यत् फलं लभते, तथैव क्रियायोगेन अपि समुपलभ्यते।''

**तपः**

विषयसुखवर्जनपूर्वकं क्रर्मेण चित्तम् एकत्रस्थापनं भवति। 'तपः द्वन्द्वसहनम्' इत्युक्तमस्ति व्यासभाष्ये। अनिर्वाणानुसारं क्रियायोगेन अन्तर्तपः (ह्रदयतपस्) वर्णितम् अस्ति। तस्य मतानुसारं ह्रदि ज्योतेः तथा अग्नेः सञ्चारणम् करणीयम्। तेन मन्यते अनेन कार्येण 'शरीरमिदं योगाग्निमयं भवेद्' इति। अनेन धृतिशक्त्याः वृद्धिप्राप्तिर्भवति। दृष्टान्तरूपेण रामकृष्ण–चौतण्यदेवयोः वर्णनम् उपस्थापितम्। तत्रोक्तं–''चौतन्यमहाप्रभु–रामकृष्णदेवयोः देहे भावोऽयं सर्वदा विद्यमानः आसीत्। देह–चौतन्यं प्रति मनसः स्थापनार्थं तपः आवश्यकम्। चेतनेयं यथार्थं तपोभूता। अनेन देहाभ्यन्तरे सत्त्वशुद्धिः वर्धते।'' अतः शरीरस्य इन्द्रियाणां च परिचालनार्थं सुख–दुःख–भुभुक्षा–तृष्णादीनां कष्टसहनेन चित्तस्य एकत्रस्थापनमेव तपः।

**स्वाध्यायः**

तपसः वर्णनान्तरं स्वाध्यायस्य वर्णनं कृतमाचार्यपादेन। साधारणतया स्वाध्यायः क्रियायोगस्य द्वितीयपर्यायो वर्तते। अनिर्वाणेनोक्तं तपसा सह स्वाध्यायोऽपि संयुक्तोऽभवत्। स्वाध्यायविषये व्यासदेवेन ''स्वाध्यायः प्रणवादिपवित्राणां जपः'' इति कथितम्।अनिर्वाणेनापि तस्य ग्रन्थे लिखितम्–''शास्त्रस्य पठनं पाठनञ्च स्वाध्यायो भवति। प्रणवजपोऽपि स्वाध्यायः।'' अतो व्यासदेवैः सह अनिर्वाणपादस्य मतसादृश्यं परिलक्षितं भवति। तेन श्रीमद्भगवद्गीतायाः दृष्टान्तोस्थापनपूर्वकं तत्र लिखितम् ''जपयज्ञ एव श्रेष्ठो यज्ञः।'' तेन मन्यते तपस्या यथा शरीरस्य साधना तथैव स्वाध्यायोऽपि भवति मनसः साधना। तेन स्वाध्यायार्थं प्रणवजपस्य इष्टमन्त्रजपस्य सूक्तपाठस्य च विधानं विहितम्।

**ईश्वरप्रणिधानम्**

ईश्वरस्वरूपचिन्तनं तस्य गुणकीर्तनं च ईश्वरप्रणिधानमिति अनिर्वाणमतम्। ततः तन्मतानुसारम् ईश्वरः सर्वज्ञो भवति। स एव सर्वेषां गुरुः इति भावः करणीयः। तेन मन्यते ईश्वरप्रणिधानेन प्रतिक्षणं क्रियायोगः सम्पद्यते। ईश्वरभावनया सर्वं कर्म सम्पन्नं भवति। तदनु कर्मफलं सर्वकर्म च परमेश्वरे समर्पणीयम्। पश्चात् सर्वदा तस्य सान्निध्ये एव योगकार्यं प्रचलति इति।ईश्वरस्य लक्षणमेवं निरूपितं पतञ्जलिना –''क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः'' इति। अनेन योगकार्येण अविद्यायाः नाशो भवति। क्रियायोगप्रसङ्गे अनिर्वाणपादेनापि सरलमार्गः समुपस्थापितः। तद् यथा –

''आदौ अन्तर्ज्योतिः प्रज्ज्वलनीया। मन्त्रसहयोगेन इष्टस्मृतेर्विनियोगः करणीयः। विनियोगोऽयम् अनुस्मृतिनाम्ना कथितोऽस्ति श्रीमद्भगवद्गीतायाम्। सर्वदा ईश्वरसान्निध्यमनुभवपूर्वकं सर्वं कर्म ईश्वरे समर्पणीयमिति तृतीयम्। कार्यत्रयं एकत्रे सम्पादिते सति क्रियायोगो भवति। क्रियायोगसफले सति योगी समाधौ प्रवर्तितो भवति।''

**योगविघ्नाः**

आचार्यवरेण स्वकीये ग्रन्थे योगविघ्नाः वैशद्येन आलोचिताः। महर्षिपतञ्जलिना योगसूत्रे चित्तस्य नवविधाः अन्तरायाः स्वीकृताः। तत्र तेनोक्तम्–''व्याधि–स्त्यानसंशयप्रमादाऽऽलस्याऽविरति–भ्रान्तिदर्शनाऽलब्धभूमिकत्वाऽनवस्थित्वानि चित्तविक्षेपास्तेऽन्तरायाः।''किन्तु अनिर्वाणपादेन तस्य ग्रन्थे त्रयोदश–अन्तरायाः वर्णिताः। यद्यपि मुख्यान्तरायानन्तरम् अवशिष्टाः अन्तरायाः

आलोचिताः महर्षिपतञ्जलिना। अनिर्वाणानुसारम् अन्तरायाणां व्याख्या निम्नधा वर्तते –

**व्याधिः–** व्याधिव्याख्यानावसरे अनिर्वाणेनोक्तम् –''व्याधिः रोगो वेति प्रथमो योगविघ्नो वर्तते। रुग्नकायेन योगः सम्पन्नो न सम्भवति। सांख्यमतानुसारं रोगाक्रान्तेण शरीरेण साधना सम्भवति, परन्तु समर्थनिमित्तं पातञ्जलयोगो वर्तते। योगसाधनायां वीर्य्यमावश्यकं भवति। तदुच्यते–'शरीरमाद्यं खलु धर्मसाधनम्''इति।

**स्त्यानम्–** अनिर्वाणेन भणितं यत् ''चित्तस्य स्तिमितत्वं व्याधिर्जायते। शरीर–प्राण–गुणानां विकारैः चित्तस्य निर्मलत्वं खण्डितं भुत्वा स्त्यानमुत्पद्यते।'' स्त्यानशब्दस्य पर्यायरूपेण जडतापदं प्रयुक्तं तेन।

**संशयः–** आचार्यमतानुसारं श्रद्धायाः प्रतिकूलस्थितिः संशयो वर्तते। संशयेन योगो सम्पूर्णो न सम्भवति।संशयस्य व्याख्याकाले श्रीमद्भगवद्गीतायाः उदाहरणं तेन प्रदत्तम्।

**प्रमादः–** प्रमादविषये तेन लिखितं यद् ''उद्यमेन हि योगस्य सिद्धिर्भवति। परिश्रमेण विना अप्रयत्नेन वा योगः असम्भवः। योगकाले उद्योगत्वं धैर्यञ्च अतीव आवश्यकं वर्तते।'' अप्रयत्नमेव प्रमादः, यत्तु योगस्य विघ्नः विद्यते।

**आलस्यम्–** अलसस्य भावम् आलस्यम्। प्रसङ्गेऽस्मिन् तेनोक्तम्–''वीर्य्यमेव योगस्य मूलशक्तिः वर्तते। वीर्य्यस्य विषमशक्तिरस्ति आलस्यमिति।''

**अविरतिः–** वि–रम्–क्तिन् इत्यनेन विरतिः। न विरतिः अविरतिः (नञ् तत्पुरुषः)। अर्थाद् विरतेः अभावः। तस्य व्याख्यायाम् अनिर्वाणपादेन लिखितम्–''वैराग्यभावनायाम् अवर्तमानो भवति। वैराग्यं विहाय योगो न सम्भवति। विषयाशक्तेः त्यागम् आवश्यकं वर्तते'' इति।

**भ्रान्तिदर्शनम्–** विपर्ययेण अविद्यया वा भ्रान्तिदर्शनं भवति। तदनुसारम् अनित्यतत्त्वे नित्यभावः, अशुचौ शुचेर्भावः, अनात्मनि च आत्मनो भावो भ्रान्तदर्शनमिति अनिर्वाणपादेन निगदितम्। पुनश्चोक्तम्–''शुद्धदृष्टिः स्थातव्या, सम्यग्दृष्टिं विहाय योगो न सम्भवः।''

**अलब्धभूमिकत्वम्–** प्रज्ञाभूमादयः विविधाः भूमयः सन्तीति तेन अनिर्वाणेन कथितम्। योगाभ्यासेन एतेषां गमनागमनं परिलक्षितं भवति। योगसाधनाकाले लब्धभूमेः स्थितिः एकस्मिन् स्थाने एकत्रीकरणीया। प्रतिदिनं तेषां स्मरणं करणीयम्, न चेत् लब्धभूमिः विलुप्ता जायते। ध्याने लब्धभूमेः प्रयत्नविषये तेन कथितम् –''चित्तं कस्मिन्नपि एकस्मिन् स्थाने स्थिरं न भवति चेद् योगे विघ्नो समायाति। यथा योगविघ्नो भवति तथैव एकस्मिन् स्थाने आबद्धोऽपि योगः योगविघ्नरूपेण कथ्यते। ततः योगिना शनैः शनैः ऊर्द्धभूमौ गमनीयम्।'' तत्र योगविघ्नस्य वर्णनकाले रामकृष्णदेवस्य दृष्टान्तमुपस्थापितम्।

**अनवस्थितत्वम्–**अलब्धभूमिकत्वेन सह अनवस्थितत्त्वस्य सम्बन्धोऽस्ति। योगी लब्धभूमिरक्षणे असमर्थो भवति चेद् अनवस्थितत्त्वम् उत्पद्यते। योगीनः लब्धभूमौ गमनान्तरं तत्र सन्देहः उत्पन्नो भवति। तत्सन्देहविषये अनिर्वाणेनोक्तम् –''सर्वबीजं सर्वसंस्कारं च यावत्पर्य्यन्तं न दग्धं भवति तावत्पर्य्यन्तम् अन्तरायोऽयं नितरां प्रचलति पुनश्च निर्वीजसमाधिरपि न सिद्धति।''

**दुःखम् –**''येनाभिहता प्राणिनस्तदुपधाताय प्रयतन्ते तद् दुःखम्'' इति दुःखविषये व्यासदेवेन योगसुत्रभाष्ये विघोषितम्।सांख्यदर्शनानुसारं जगति अस्मिन् त्रिविधं दुःखं वर्तते, तत् खलु आधिदैविकमाधिभौतिकमाध्यात्मिकञ्चेति।परन्तु अनिर्वाणमतानुसारं दुःखं मनसः विघ्नो भवति। श्रीमद्बगवद्गीतायाः दृष्टान्तोल्लेखपूर्वकं तेन लिखितम्–''स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा'–दृढसंकल्पेन तथा प्रसन्नचित्तेन सह योगः करणीयः।'' तेन मन्यते यस्य चित्तेन सर्वदा दुःखम् अनुभूतम्, सः योगाभ्यासे

असमर्थो भवति। योगाय चित्तप्रसादमावश्यममिति तन्मतम्।

**दौर्मनस्य–** मनसः अभिप्राय अपूर्णे भवति चेत् चित्ते विक्षोभोत्पद्यते, तदेव 'दौर्मनस्य' नाम्ना परिचितोऽस्ति। तस्य व्याख्यायां आचार्यवरेणोक्तम् "प्राणस्य विघ्नोऽयम्। चित्तस्य मलिनो भावः। अनेन मनसः दुःखम् अनुभूयते"इति।

**अङ्गमेजयत्वम्–**शरीरकम्पनम् एव अङ्गमेजयत्वमिति। शारीरिकविघ्नोऽयम्। अनिर्वाणेन कथितम्–"विघ्नोऽयम् आसनसाधनेन नाशो भवति। स्रोतानुकूले दण्डस्थापने यथा कम्पनं भवति, तथैव कायकम्पनं सम्पद्यते। आसन–प्राणायामाभ्यां कायकम्पनं निवार्यते।" दृष्टान्तरूपेण रामकृष्णदेवस्य ध्यानतत्त्वस्योल्लेखं कृतम्।

**श्वासप्रश्वास विक्षेपसह भुवः–** अनिर्वाणानुसारम् अन्तिमयोगविघ्नोऽयम्। तस्य मतानुसारं शीघ्रं श्वासग्रहणं योगप्रतिकूलं वर्तते। योगानुकूलं श्वासग्रहणस्य विधानं तेन प्रदत्तम्। तेनोक्तम्–"शयनानन्तरं शिशुवत् मृदुकम्पनसमन्वितं लयप्रयुक्तं श्वास–प्रश्वासं योगानुकूलं भवति।"

अर्थात् कायस्य मनसः वाचश्च योगविघ्नाः भवन्ति। एतेषां विघ्नानां वर्जनपुरस्सरं योगाभ्यासे मनः स्थापितव्यम्। तदर्थं पुनः पुनः अभ्यासः करणीयः। अभ्यासोऽयम् एकतत्त्वेन सम्पादितव्यः। विषयेऽस्मिन् पतञ्जलिना प्रक्तोम् –"तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः।"

योगदर्शनमनुसरणं कृत्वा अनिर्वाणेनोऽपि एकतत्त्वाभ्यासस्य वार्ता प्रदत्ता। अतः तेनोक्तम् –"सर्वविघ्नाः एकतत्त्वाभ्यासेन दूरीभवन्ति। तेन तत्त्वेन एकाग्रत्वं स्थापनीयम्। यावत्पर्यन्तम् एकाग्रभूमौ स्थिरता न परिलक्षिता भवति तावत्पर्यन्तं योगोऽसम्भवः।" अतः योगविघ्नेभ्यः परित्राणाय पतञ्जलि–अनिर्वाणादिसर्वदार्शनिकाः एककण्ठेन अद्वैततत्त्वं स्वीकृतवन्तः।

## संदर्भ सूची

1. अनिर्वाण। *वेदमीमांसा (१खण्ड)* । कलकत्ता : संस्कृत–कलेज, १९६५। पृ. १०२
2. तदेव। पृ. १०२
3. श्रीवरदाप्रसाद–वसुः। *शब्दकल्पद्रुम् (४ खण्डः)* । वाराणसी : चौखम्बा संस्कृत सीरीज आफिस, तृतीयसंस्करणम्। पृ. ५०
4. श्रीमद्गुरुनाथविद्यानिधि–भट्टाचार्यः /*अमरकोषः*। कोलकत्ता : संस्कृत–पुस्तक–भाण्डार, २०१०। पृ. ३३७
5. गीता. २ । ४८
6. तदेव। २।५०
7. तदेव। ६।१०
8. तदेव। ६।१४
9. पातञ्जलयोगदर्शनम्. १।२
10. स्वामीभर्गानन्द। *पातञ्जलयोगसूत्रम्* । कलकत्ता : उद्बोधनकार्यालयः, २०१४। पृ.१
11. अनिर्वाणः। *अनिर्वाण आलोय पातञ्जल योग–प्रसङ्ग* । कलकत्ता : प्राचीपावलिकेशन्, २००६। पृ.११
12. श्वे.उ. २।१२
13. पातञ्जलयोगदर्शनम्. १।४१
14. अनिर्वाणः। *अनिर्वाण आलोय पातञ्जल योग–प्रसङ्ग* । कलकत्ता : प्राचीपावलिकेशन्, २००६। पृ. ४६
15. तदेव। पृ. ४६
16. तदेव। पृ. ४६
17. तदेव। पृ. ४६
18. पातञ्जलयोगदर्शनम्. १।४३
19. तदेव. १।१८
20. पातञ्जलयोगदर्शनम्. १।१८ इत्यस्य व्यासभाष्यं द्रष्टव्यम्।
21. अनिर्वाणः। *अनिर्वाण आलोय पातञ्जल योग–प्रसङ्ग* । कलकत्ता : प्राचीपावलिकेशन्, २००६। पृ. ५२
22. पातञ्जलयोगदर्शनम्. २।१
23. अनिर्वाणः। *अनिर्वाण आलोय पातञ्जल योग–प्रसङ्ग*। कलकत्ता : प्राचीपावलिकेशन्, २००६। पृ. ५५
24. तदेव। पृ. ५५
25. स्वामीभर्गानन्द। पातञ्जलयोगसूत्रम् । कलकत्ता : उद्बोधनकार्यालयः, २०१४। पृ.८४
26. अनिर्वाणः। *अनिर्वाण आलोय पातञ्जल योग–प्रसङ्ग* । कलकत्ता : प्राचीपावलिकेशन्, २००६। पृ. ४१
27. तदेव। पृ. ४१
28. तदेव। पृ. ५६
29. पातञ्जलयोगदर्शनम्. १।२४

30. अनिर्वाणः। *अनिर्वाण आलोय पातञ्जल योग–प्रसङ्ग* । कलकत्ता : प्राचीपावलिकेशन्, २००६। पृ. ५६
31. पातञ्जलयोगदर्शनम् १।३०
32. अनिर्वाणः। *अनिर्वाण आलोय पातञ्जल योग–प्रसङ्ग* । कलकत्ता : प्राचीपावलिकेशन्, २००६। पृ. ६१
33. तदेव। पृ. ६१
34. तदेव। पृ. ६१
35. तदेव। पृ. ६१
36. तदेव। पृ. ६१
37. तदेव। पृ. ६१
38. तदेव। पृ. ६२
39. तदेव। पृ. ६२
40. स्वामीभर्गानन्द। *पातञ्जलयोगसूत्रम्* । कलकत्ता : उद्बोधनकार्यालयः, २०१४। पृ.४६
41. सांख्यकारिका–१
42. अनिर्वाणः। *अनिर्वाण आलोय पातञ्जल योग–प्रसङ्ग* । कलकत्ता : प्राचीपावलिकेशन्, २००६। पृ. ६२
43. तदेव। पृ. ६२
44. तदेव। पृ. ६२
45. तदेव। पृ. ६३
46. पातञ्जलयोगदर्शनम् १।३०
47. अनिर्वाणः। *अनिर्वाण आलोय पातञ्जल योग–प्रसङ्ग* । कलकत्ता : प्राचीपावलिकेशन्, २००६। पृ. ६२

## Bibliography


1. *Anirvāṇa-Āloy-Pātañjal-Yoga-Prasaṅga of Śrīmat Anirvāṇa,* Ed.By SudiptaMunsi. Kolkata: Prachi Publication, 2006.
2. *Veda- Mīmāṁsā of Śrīmat Anirvāṇa Vol. I.* Ed. by Sanskrit College. Calcutta: Sanskrit College, 1961.
3. *Antaryoga of ŚrimatAnirvān*. Kolkata: HaimavatiPrakashani, 1997.
4. *Yogadarśanam of MaharṣiPatañjali*, Ed by Devi SahaiPandey. Delhi: Chaukhamba Sanskrit Pratishthan, 2013.
5. *Yogadarśana of Pātañjali*, Ed. by Swami Bharganananda. Kolkata: Udbodhankaryalaya. 2014.
6. *Yogadarśana of Pātañjali,* Ed. By ShrimadHariharananda, Kolkata:Paschimbanga Rajya Pustak Parshad. April, 1988.
7. *Śrīmadbhagabadgītā,* Ed. By Swami Basudevananda, Kolkata: Udbodhankaryalaya. April2019
8. *Amarkoṣaḥ*, Ed. By SrimadGurunathBidyanidhi, Kolkata: Sanskrit PustakBhander. 2010.
9. *Śabdakalpadrumaḥ*, Ed. By Sri Barada Prasad Basu, Varanasi: Chowkhamba Sanskrit Series Office. 1967.